# अनुमानमातृका सावचूरि

**- सं. मुनि कल्याणकीर्तिविजय**

आ प्रति मारा पू. गुरुभगवंतना अंगत संग्रहनी छे । प्रायः सत्तरमा सैकानी आ प्रति पंचपाठी छे । प्रतिमां क्यांय कर्ताना नामनो उल्लेख नथी परन्तु रचनाशैली जोतां कोई जैनमुनिए रचेली होय एवुं लागे छे । प्रतिना लेखक श्री पूज्यश्रीसूरसुन्दरसूरिना शिष्य पं. समयमाणिक्य गणिना शिष्य छे अने तेमणे श्रीसुन्दरतीर्थ गणि माटे आ प्रति लखी छे एवुं तेमांना उल्लेखथी स्पष्ट जणाय छे। प्रतिनी किनारी फाटी गयेल छे पण अक्षरो सुवाच्य छे अने शुद्धि सारी छे ।

अनुमानमातृका नामक आ प्रकरणमां नैयायिक दर्शनना मते अनुमान खंडनुं प्रारंभिक अभ्यासी माटे मार्गदर्शन करेल छे । प्रकरणना कुल १३ श्लोको छे अने तेनी नानकडी अवचूरि पण आपेल छे, जे स्वोपज्ञ प्रतीत थाय छे.

आ ज प्रतिनी बीजी पण एक नकल मळेल छे जे पण पंचपाठी अने प्रायः सत्तरमा सैकानी छे । लेखक पं. ज्ञानविमल गणि छे । अक्षरना मरोड अने अशुद्धिओ जोतां लेखके अभ्यासकालमां लखेल होय तेवुं लागे छे ।

संपादननो अनुभव बिलकुल नथी छतांय अभ्यासीओने उपयोगी थाय ते माटे पू. गुरुमहाराजनी प्रेरणाथी यथामति संपादित करी अत्रे रजू करेल छे ।

## ॥ अनुमानमातृका ॥

॥ ऐं० ॥

अविनाभूताल्लिङ्गाद्विज्ञानं लिङ्गिनोऽनुमानं स्यात् ।
लिङ्गस्य लिङ्गिना सह या व्याप्तिः सोऽविनाभाव : ॥

यौगदृगपेक्षया तत्पञ्चांशं ते प्रतिज्ञया (१) हेतुः (२)
दृष्टान्तः (३) सोपनयो (४) निगमनम् (५) इति निगदिता वि[१]दुरैः ॥२॥

श्रितसाध्यधर्म्मपक्षाऽपरनामकधर्मिगीः प्रतिज्ञाख्यः ।
प्रथमो यथेह पृथ्वीधरे[२] बृहद्भानुरिति हेतुः ॥ ३ ॥

हेतुत्वाभिव्यञ्जकविभक्तिका लिङ्गवाग् यथा धूमात् ।
तद्व्यासे रुपदर्शनभूर्दृष्टान्तोऽथ सा द्वेधा ॥४॥

१. पण्डितैः । २ पर्वते न (?) अग्निः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेतौ सति साध्यस्याऽवश्यम्भावित्वमन्वयव्याप्तिः ।
यद्वद् धूमो यत्राऽग्निस्तत्रेत्यत्र पाकगृहम् ॥ ५ ॥

व्यतिरेकव्याप्तिः स्याद्धेतौ साध्येऽसति ध्रुवमभावः ।
यद्वद्यत्राग्निर्नो न तत्र धूमोऽपि कूपोऽत्र ॥ ६ ॥

धूमश्चात्रेत्युपसंहरणं हेतोश्च धर्म्मिणि तुरीयः ।
साध्यस्य तन्निगमनं स्यात्तस्मादग्निरत्रेति ॥ ७ ॥

हेत्वाभासाः पञ्चाऽसिद्धोऽनैकान्तिको विरुद्धश्च ।
कालात्ययाऽपदिष्टः प्रकरणसम इति मताश्च[३]तुरैः ॥ ८ ॥

सोऽसिद्धश्चिद्रूपैरनिश्चिता पक्षवर्तिता यस्य ।
यद्वदनित्यः शब्दश्चक्षुर्दृश्यत्वतो घटवत् ॥९॥

स विरुद्धः साध्यविपर्ययेण सह यस्य जायते व्याप्ति :
यद्वच्छब्दो नित्यः कृतकत्वादन्तरिक्षमिव ॥ १० ॥

सोऽनैकान्तिकनामा प[४]क्ष-सपक्षवदितो विपक्षं यः ।
व्योमवदव्ययशब्दं साधयत इव प्रमेयत्वम् ॥ ११ ॥

प्रत्यक्षादिनिराकृतसाध्यः कालात्ययापदिष्टाख्यः ।
जलवच्छीतलमनलं यथा पदार्थत्वतो वदतः ॥ १२ ॥

साध्यविपर्यययोः स्यात्तुल्यः प्रकरणसमो यथा नित्यः ।
शब्दः पक्षसपक्षाऽन्यतरत्वादन्तरिक्षमिव ॥ १३ ॥

[५]इत्यनुमानमातृका सुन्दरतीर्थगणिकृते लिखिता श्रीपूज्यश्रीसूरसुन्दर-सूरिविनेयपं समयमाणिक्यगणिशिष्येण ॥

---

३. पण्डितैः । (एताः टिप्पणयः प्रत्यन्तरे ।)

४. नित्यत्वे साध्ये नित्यत्वतां सपक्षता । नित्यत्ववान् सपक्षः । अनित्यत्वे हि साध्ये अनित्यत्ववतां सपक्षता । अनित्यत्ववान् सपक्षः । अनित्यत्वतां विपक्षता । अनित्यत्ववान् विपक्षः। नित्यत्ववतां विपक्षता । नित्यत्ववान् । विपक्षः। (प्रत्यन्तरे टि.)

५. इत्यनुमानमातृका । पं. श्री ६ ज्ञानविमल ॥ जालोरनगरे ॥ श्रीकल्याणमस्तु ॥ ( इति प्रत्यन्तरे ) ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुमानमातृका-अवचूर्णिः

१. **अविना०** । विना साध्यभावेन भूतं विनाभूतं, न विनाभूतं अविनाभूतं साध्यसहचरमित्यर्थः । तथाविधात् लिङ्गात्साधनाल्लिंगिनः साध्यस्य विज्ञानं सम्यगर्थनिर्णयात्मकविशिष्टज्ञानमनुमानं स्यादिति सम्बन्धः । अनु लिंगग्रहणसंबंधस्मरणयोः पश्चान्मीयते परिच्छिद्यते परोक्षोऽप्यर्थोऽनेनेत्यनुमानं । अन्यत्राप्युक्तम्

**पञ्चलक्षणाल्लिङ्गाद् गृहीतान्नियमस्मृतेः ।**
**परोक्षे लिङ्गिनि ज्ञानमनुमानं प्रचक्षते ॥ १ ॥**

अविनाभूतादित्युक्तमतोऽविनाभावमाह - लिङ्ग. ।

लिंगे सति लिङ्गी भवत्येव । लिङ्गिन्यसति च लिङ्गं न भवत्येवेत्येवंरूपा व्याप्तिरविनाभावः । सा च वक्ष्यतेऽग्रे ॥ १ ॥

२. **यौ०** । नैयायिकमतमाश्रित्य पञ्चावयवमनुमानमित्यर्थः । अनेन चाऽन्येषां न्यूनाऽधिकावयवमपि स्यादि सूच्यते । यदुक्तम्-

**पञ्चावयवं यौगाः सृजन्ति मीमांसकाश्चतुरवयवम् ।**
**सांख्यास्त्र्यवयवमार्हतबौद्धाश्च द्व्यवयवं तदिह ॥१ ।**

पञ्चावयवं नैयायिकाः, उपनयान्तं मीमांसकाः, दृष्टान्तान्तं सांख्याः, हेत्वन्तं आर्हताः, व्याप्तिपूर्वकदृष्टान्तोपनयसहितं बौद्धाश्च कुर्वत्यनुमानमित्येतदार्यार्थः । तेऽंशाः । सहार्थे तृतीया, इतिरेवमर्थे ॥ २ ॥

३. **श्रित०** । साध्यधर्म्मवतः पक्षेत्यपरनाम्नो धर्म्मिणः पर्वतादेर्गीर्वचनं प्रतिज्ञा स्यादित्यर्थ : । अस्तीह पृथ्वीधरेऽग्निः । इतिः प्रकारार्थे । शेषोदाहरणेष्वपि ज्ञेयः ॥३॥

४. **हेतु०** । हेतुत्वज्ञापकपञ्चम्यादिविभक्त्यन्तं लिङ्गवचनं हेतुरित्यर्थः । हेतुव्याप्तेरुपदर्शनं परस्मै प्रतिपादनं तस्य भूराश्रयः ॥४॥

५-६. **हेतौ०** । यत्र धूमस्तत्राग्निः अथवा यत्र यत्र धूमस्तत्र तत्राग्निरिति व्याप्तिः कार्या । अत्र व्याप्तौ पाकगृहं महानसं दृष्टान्तः । **व्यति.** यत्राग्निर्न स्यात्तत्र धूमोऽपि नेति व्याप्तिः कार्या । अत्र व्याप्तौ कूपो दृष्टान्तः । एवं व्याप्तिद्वैविध्याद दृष्टान्तोऽपि द्विविधः स्यात् । तत्र साध्यसाधनसद्भावकृतसाध्यसाधर्म्यात्साधर्म्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टान्तः (१) । साध्यसाधनाऽभावजनितवैधर्म्याद्वैधर्म्यदृष्टान्तः । (२) इति ॥५॥

७. **धूम०** । धर्मिणि उपसंहरणं कोऽर्थ : ? दृष्टान्तधर्मिणि विसृ(श्रु)तस्य साधनस्य साध्यधर्मिण्युपनयनं तद्धर्मिण्युपसंहरणम् ॥७॥

८. **हे०** । हेतुलक्षणरहिता हेतुवदाभासमानाः । नामकथनव्यतिक्रमः पाठानुकुल्यात् । ॥८॥

९-१० **सो०** । अनिश्चिता संदेहगोचरीकृता विप्रतिपत्तिविषयीकृता वा ॥९॥१०॥

११. **सोऽने०** । एकस्मिन्मते साध्यधर्मे नियत एकान्तिकस्तद्विपरीतः अनैकान्तिकः । व्यभिचारीत्यपि । नित्यः शब्दः प्रमेयत्वात् व्योमवदिति प्रयोगः ॥११॥

१२. **प्रत्य०** । आदिशब्दादनुमानागमादिग्रहः । प्रमाणाऽनुपहतपक्षोपन्या साऽनंतरं हेतूपन्यासस्य समयः कालस्तदत्ययेऽतिक्रमे सति अपदिष्टः कालात्ययापदिष्टः कालातीत-समयातीत-बाधितविषया इत्यादिनामानि । अनलः शीतलः पदार्थत्वात् जलवदिति प्रयोगः प्रत्यक्षबाधोदाहरणम् । अनुमानबाधो यथा-परमाणवोऽनित्या मूर्त्तत्वाद् घटवदित्यत्र । परमाणवोऽनित्या अकार्यत्वादाकाश-वदित्यनेन बाध्यते । नन्वस्यानुमानस्य को विशेषो येनेदं तद्बाधकमिति चेत्

**यस्मादणुतरो नास्ति सक्रियो नित्य एव वा ।**
**नित्यत्वे सत्यजन्यो यः परमाणुः स लक्षितः ॥ १ ॥**

इत्यागमबद्धमूलत्त्वेन बलीयस्त्वम् । ततो बलवता दुर्बलं बाध्यत इति सार्वत्रिकन्यायादेतद् बाधकं स्यादिति ॥ १२ ॥

१३. **साध्य०** । पक्षः शब्दः सपक्षो व्योमादि, तयोरन्यतरत्वं एकतरत्वम् । पक्षत्वं सपक्षत्वं चेति यावत् । अयं चैक एव हेतुर्नित्यत्व इव । अनित्यः शब्दः पक्षसपक्षयोरन्यतरत्वाद् । घटवदिति । अनित्यत्वेऽपि त्रिरूपतया वर्त्तमानः प्रकरणसमः स्यात् । तथा नित्यः शब्दोऽनित्य धर्म्मरहितत्वादित्यादयोऽपि ज्ञेयाः । सत्प्रतिपक्ष इत्यप्यभिधा एतस्य ॥१३॥

[1]इत्यनुमान मातृकावचूर्णिः संपूर्णा । लिखिता राजपुर महानगरे ॥

---

१. इत्यनुमानमातृकाऽवचूरिः ॥ (इति प्रत्यन्तरे ।)

Jain Education International For Private & Personal Use Only www.jainelibrary.org